# उपसंहारः

शरच्चन्द्रांशुसन्दोहध्वस्तदोषात्तमः शिवम् ।

कृष्णाय हस्ततरलाचितकोमलवालुकम् ॥[1]

महर्षिणा व्यासेन श्रीमद्भागवते भगवतः लीलापुरुषोत्तमस्य श्रीकृष्णस्य विविधानां क्रीडानां साङ्गोपाङ्गनिरूपणं भक्तियोगदृष्ट्या कर्मयोगदृष्ट्या, उपासनायोगदृष्ट्या, ज्ञानयोगदृष्ट्या च स्वभावानां श्लोकपुष्पमालाभिः निबद्धं श्रीमद्भागवतं पूर्णरूपेण सहृदयानां रसवेद्यानां काव्यतत्त्वज्ञानानां कृते रचना रचिता ।

संस्कृतसाहित्ये अस्य पुराणमुकुटमणेः श्रीमद्भागवतस्य सर्वत्र बाह्याभ्यान्तररूपेण उपजीव्यरूपेण च विविधेषु काव्येषु अस्य प्रभावः रामकृष्णाश्रितकाव्येषु प्रायेण प्रतिग्रन्थं संदर्शयितुं शक्यते । व्यासस्य वर्णनशैलीं स्वीकृत्यैव विभिन्नैराचार्यैः महाकविभिश्च स्वग्रन्थं काव्यं च विरचितमिति । शोधस्य विषयः “श्रीमद्भागवते काव्यतत्त्वविमर्शः” इति स्वीकृत्य कार्यं प्रारब्धम् । विषयस्य गाम्भीर्यं वैशिष्ट्यं विलोक्य शोधशीर्षकं पञ्चस्वध्यायेषु विभक्तः । प्रथमे हि किं नाम पुराणम् ? किं च तस्य वैशिष्ट्यं महत्त्वादिकं विविच्य महापुराणेषु श्रीमद्भागवतस्य महापुराणत्वमित्यादिकं समालोच्य अवान्तरविषयरूपेण वेदादारभ्य पुराणकालपर्यन्तं भागवते वर्णितविषयाणां भाषाशैली कथानकञ्चोपस्थापितम् । विषयाणां सन्दर्भदृष्ट्या वैशिष्ट्यं विविच्य के के वर्ण्यविषयाः श्रीमद्भागवते सन्ति

[1] श्रीमद्भागवते १०/३२/१२

इति सर्वं समाहृत्य भागवतस्य देशकालादिपरिचयमुपस्थाप्यास्य ग्रन्थस्य टीकानां वैशिष्ट्यं महत्त्वञ्च निबद्धम् ।

श्रीमद्भागवते विविधानि रहस्यानि गूढरूपेण सन्निहितानि सन्ति । विविधरहस्योद्घाटनास्य ग्रन्थस्य विमर्शं विना न भवेद् इत्याशयेन अस्य शास्त्रीयं वैशिष्ट्यं, आध्यात्मिकतत्त्वम्, तत्त्विकरहस्यञ्चामि द्वितीयस्तम्भरूपेण आलोचितं मया । प्रकृतगन्थस्य काव्यतत्त्वविमर्शमावश्यकमित्याधारीकृत्यैव किं नाम काव्यम्, किं नाम काव्यतत्त्वञ्च इत्यनयोः विषयोः काव्यविमर्शात्मकरूपेण समाविष्टमत्र । अनेन सह काव्यतत्त्वविषयेषु काव्यशास्त्रीणां विविधानामाचार्याणां मतमप्यपस्थापितमत्र । काव्यशास्त्रिभिः यानि काव्यतत्त्वानि समाहृतानि तत्तत्त्वानि श्रीमद्भागवते कानि रूपाणि सन्त्येवं विचार्य श्रीमद्भागवते अलङ्कारादारभ्य गुणदोषादिनिरूपणपर्यन्तं प्रसिद्धकाव्यतत्त्वविषयकवर्णनमत्र समालिष्टम् ।

काव्यस्य सर्वस्वं रस एव सर्वैः स्वीकृतः । तर्हि रसमेवकाव्यजीवनं काव्यशास्त्रिभिः प्रकटितम् । अनेन कारणेन को नाम रसः कति विधश्च सः, इति विलिख्य वेदादारभ्य जगन्नाथपर्यन्तस्य सर्वस्य रसविषयिकी धारणा, तदाधाररूपेण शरीररूपेण च शब्दार्थौ भवतः । एतत् सर्वं श्रीमद्भागवते वर्णितकाव्यतत्त्वानां साङ्केतितकाव्यरहस्यानां साङ्गोपाङ्गं सोदाहरणमत्र प्रकटितं मया ।

वेदोत्तरकालिकं मूर्धन्यं महाकाव्यं श्रीमद्भागवतमेवास्ति नास्त्यत्र संदेहावसरः । यतोहि सर्वैः विद्वद्भिः मतमिदं स्वीकृतम् । अनेन कारणेन श्रीमद्भागवतस्य कीदृशी भाषाशैली, कीदृशं च छन्दविधानमिति सर्वमालोड्य श्रीमद्भागवतस्य काव्यतत्त्वनिदर्शनमत्र प्रस्तुतम् ।

ततः परं काव्यतत्त्वानां किं वैशिष्ट्यं साम्प्रतिके युके का च तेषामुपयोगिता इति विविच्य आलोच्य विषयाणां काव्यतत्त्वानां च विश्लेषणं समीक्षणञ्च आवश्यकं भवेदिति सञ्चित्य श्रीमद्भागवतोक्तकाव्यतत्त्वानां सोदाहरणैः विश्लेषितं मया ।

ततः शोधप्रबन्धेस्मिन् श्रीमद्भागवतस्थकाव्यतत्त्वानां सर्वं समीक्ष्य सन्दर्भग्रन्थनामावली संग्रथितेति ।

---------------